# 2019

# B.A.

## 1st Semester Examination

## SANSKRIT (Honours)

## Paper : C 2-T

*Full Marks : 60* *Time : 3 Hours*

*Candidates are required to give their answers in their own words as far as practicable.*

*The figures in the margin indicate full marks.*

1. अधोनिर्दिष्टेषु *प्रश्नदशकं सुरगिरा देवनागर्या* च पूर्णवाक्येन लिख्यताम् : 10×2=20

(क) 'शुकनासोपदेशः' इत्याख्यानं केन विरचितम्? कः आसीत् कवेः पृष्ठपोषकः?

(ख) 'कादम्बरी' इति पदस्य कोऽर्थः?

(ग) कः आसीत् चन्द्रापीडः?

*[ Turn Over ]*

(घ) गद्यकाव्यस्य कति भेदाः ? उल्लिख्यन्ताम्।

(ङ) शुकनासः कदा कमभिलक्ष्य उपदिष्टवान् ?

(च) कस्मात् आकरग्रन्थात् 'विश्रुतपरितमि'ति गद्यांशः आकलितः ? कोऽस्य प्रणेता ?

(छ) कः आसीत् पुण्यवर्मा ?

(ज) 'अनो विहाय वाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्याम्'-कः कमुद्दिश्य इदमुक्तवान् ?

(झ) 'वार्ता' इति परिभाषया किं बोध्यते ?

(ञ) 'सामादिरुपायवर्गः' इत्यस्य कोऽर्थः ?

(ट) का आसीत् 'कादम्बरी'ति गद्यकाव्यस्य नायिका ?

(ठ) 'पुरुषपरीक्षा' कीदृशं काव्यम् ? केन विरचितम् ?

(ड) 'सिंहासनद्वात्रिंशिका' इति संकलनग्रन्थस्य नामान्तरमुल्लिख्यताम्। कं नृपं विषयीकृत्य इदं विरचितम् ?

(ढ) 'हितोपदेशः' इति ग्रन्थस्य अध्यायनामानि लिख्यन्ताम् ?

(ण) कः आसीत् अम्बिकादत्तः व्यासः ? तेन किं संस्कृतकाव्यं विरचितम् ?

2. अधोलिखितानां प्रश्न*चतुष्टयं* समाधेयम् (तेषा*मेकं* सुर*गिरा देवनागर्या* च अवश्यमेव लेखनीयम्) : 4×5=20

(क) 'अलिगहनं तमः यौवनप्रभवम्'–कः कमुद्दिश्य इदमुक्तवान्? अलिगहनं यौवनप्रभं तमः कीदृशं भवति?

(ख) 'राज्यविषविकारतन्त्रीप्रदा राजलक्ष्मीः'—स्पष्टीक्रियताम्।

(ग) कः आसीत् वसुरक्षितः? स कदा कथमुपदेशदाने प्रवृत्तोऽभवत्?

(घ) नृपः स्वप्रेषितैः दूतैः कथं प्रतारितो भवति?

(ङ) 'वाणो वाणी बभूव'—व्याख्यायताम्।

(च) प्रातरुत्थाय दिवसस्य प्रथमे भागे राज्ञा किं करणीयम्?

3. अधोलिखितेषु प्रश्न*द्वयं* समाधेयम् :— 2×10

(क) 'महतीयं खल्वनर्थपरम्परा'—कः कमभिलक्ष्य इदमुक्तवान्? 'अनर्थपरम्परा' इत्यस्य तात्पर्यं व्याख्यायताम्।

(ख) विश्रुतः विन्ध्यारण्ये परिभ्रमणकाले किमपश्यत्? स केनोपायेन तस्य तत्कालीनं कर्तव्यं सम्पादितवान्?

[ Turn Over ]

(ग) 'दण्डिनः पदलालित्यम्'—सोदाहरणम् इत्युक्तेः तात्पर्यं व्याख्यायताम्।

(घ) 'पञ्चतन्त्रम्' इति ग्रन्थस्य परिचयप्रदानपूर्वकं संस्कृत-कथासाहित्ये अस्य मूल्यं निरूप्यताम्।

---